05-06-2021

अनिवार्यपत्रम्। शास्त्री II

करणछात्रहेतवे। रघुवंशम्। श्लोकव्याख्या।

" असौ शरण्यः शरणोन्मुखानामगाधसत्त्वो मगधप्रतिष्ठः।
राजा प्रजारञ्जनलब्धवर्णः परन्तपो नाम यथार्थनामा ॥ "

सन्दर्भः → प्रस्तुतोऽयं श्लोकः कविकुलगुरुकालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य षष्ठसर्गादिन्दुस्वयंवरवर्णनादुद्धृतोऽस्ति।

प्रसङ्गः → प्रतिहाररक्षी सुनन्दा सर्वप्रथमं मगधेश्वरं समीपमिन्दुमतीम् - आदाय सविशेषं परिचयमेवं कविमुखेन प्रकाशितवती।

अन्वयः → असौ शरणोन्मुखानां शरण्यः अगाधसत्त्वः प्रजारञ्जन - लब्धवर्णः मगधप्रतिष्ठः यथार्थनामा परन्तपः नाम राजा अस्ति।

शब्दार्थः व्याकरणञ्च → असौ = सन्मुखोऽयम्। शरणोन्मुखानाम् → शरणार्थम् उन्मुखाः शरणोन्मुखाः, तेषां शरणोन्मुखानाम् = आश्रयप्राप्तानाम्। शरण्यः → √शॄ + यत् = रक्षकः, आश्रययोग्यः। अगाधसत्त्वः → अगाधं सत्त्वं यस्य सः = गम्भीरप्रकृतिः। प्रजारञ्जनलब्धवर्णः → प्रजानां रञ्जने लब्धवर्णः = स्वजनानुरञ्जनविचक्षणः। मगधप्रतिष्ठः → मगधेषु प्रतिष्ठा यस्य सः = मगधराजप्रतिष्ठास्पदम्। यथार्थनामा = सत्यार्थाभिधेयः। परन्तपः → परम् + तपः = एतन्नामकः राजा।

तात्पर्यः → सुनन्दा इन्दुमतीं कथयति यत् शरणागतरक्षको महाशक्तिसम्पन्नो मगधदेशप्रतिष्ठः प्रजानुरञ्जने ख्यातोऽयं परन्तपो नामकः राजा दृश्यते।

विशेषः → अस्मिन् श्लोके शृङ्गाररसः, वैदर्भीरीतिः, प्रसादगुणः अनुप्रासालङ्कारः, उपजातिवृत्तञ्च।

(हस्ताक्षर) 05-06-2021

डॉ० निर्मलकुमार झा, (स० प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

05-06-21

साहित्य (प्रतिष्ठा)　　　　शास्त्री III

अष्टम् पत्रम् ।　　मालविकाग्निमित्रम् ।　　श्लोकव्याख्या ।

" शरीरं क्षामं स्यादसति दयितालिङ्गनसुखे
भवेत्सास्रं चक्षुः क्षणमपि न सा दृश्यत इति ।
तया सारङ्गाक्ष्या त्वमसि न कदाचिद्विरहितं
प्रसक्ते निर्वाणे हृदय परितापं व्रजसि किम् ? "

कविकालिदासरचितः मालविकाग्निग्रन्थात् तृतीयाङ्कात् प्रथमो श्लोकः ।

**अन्वयः** → दयितालिङ्गनसुखे असति शरीरं क्षामं स्यात्, सा क्षणमपि न दृश्यते इति चक्षुः सास्रं भवेत् (किन्तु) हृदय! त्वं तया सारङ्गाक्ष्या कदाचित् विरहितं न असि, निर्वाणे प्रसक्ते परितापं किं वहसि ?

**शब्दार्थाः व्याकरणश्च** → दयितालिङ्गनसुखे = प्रियाङ्गसङ्गप्रमोदावस्थाविशेषे । दयितायाः आलिङ्गनम् दयितालिङ्गनम् तेन सुखम् दयितालिङ्गनसुखम् तस्मिन् दयितालिङ्गनसुखे । असति = अजायमाने । क्षामम् = क्षीणम् । स्यात् = सम्भवेत् । क्षणमपि = ईषत्समयमपि । सास्रम् = अश्रुजलपूर्णम् । हृदय = चेतः । सारङ्गाक्ष्या = मृगलोचनया तया मालविकया । कदाचित् = कदापि । विरहितम् = दूरम् । निर्वाणे = निवृत्तौ सुखे । प्रसक्ते = प्राप्ते । वहसि = नयसि । परितापम् = सन्तापम् ।

**अलङ्कारः** → विभावनाविशेषोक्तिमूलक सन्देहसंकरः ।

**छन्दः** → शिखरिणी → रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी ।

05-06-21

डॉ० निर्मल कुमार झा, स० प्राचार्य
रा० उ० सं०म०वि० सुखसेना, पूर्णियाँ ।

05-06-2021

उपशास्त्री

अनिवार्य प्रथमपत्रम् ।

संस्कृतानुवाद: →

6. सिकता (बालू), समा (वर्ष), अप (जल), वर्षा आदि शब्द स्त्रीलिङ्ग, बहुवचन होते हैं। यथा → सिकतासु, वर्षासु।

7. संख्यावाचक शब्द 'एक' केवल एकवचन में होता है प्रथमा विभक्ति एकवचन में लिङ्गानुसार रूप होंगे → एक: (पुं०), एका (स्त्री०), एकम् (क्लीव०, नपुंसक०)

8. द्वि यानि दो (2) शब्द केवल द्विवचन में होते हैं। प्रथमा वि० द्विवचन में लिङ्गानुसार रूप निम्नलिखित होंगे → द्वौ (पु०), द्वे (स्त्री०), द्वे (क्लीव० नपुंसक०)

9. त्रि (तीन) से लेकर अष्टादश (अठारह) तक के सभी संख्यावाचक शब्द बहुवचन में होते हैं।

प्रथमा वि० बहुवचन (बहुवचन) में लिङ्गानुसार रूप →

| | | |
|---|---|---|
| त्रय: (पु०) | तिस्र: (स्त्री०) | त्रीणि (नपुंसक०) |
| चत्वार: " | चतस्र: " | चत्वारि " |
| पञ्च " | पञ्च " | पञ्च " |
| षट् " | | |
| सप्त " | सप्त " | सप्त " |
| अष्टौ / अष्ट " | अष्टौ / अष्ट " | अष्टौ / अष्ट " |
| नव " | नव " | नव " |
| दश " | दश " | दश " |

शिष्टं अपरेद्यु: ।

05-06-21

डॉ० निर्मल कुमार झा, स० प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

शास्त्री-I (साहित्यम्) 05-06-2021

## शिशुपालवधम् ।

प्रश्न:→ माघकाव्यानुसारेण अम्बराद्‌वतरतो भगवत: नारदस्य वर्णनं कुरुत।

उत्तरम् → महाकवि: माघ: स्वकीये महाकाव्ये शिशुपालवधस्य प्रथमसर्गे काव्यारम्भे आकाशमार्गेण स्वर्गात् भूमाववतरतो भगवत: नारदस्य वर्णनक्रमे कथयति यत् भगवन्तं श्रीकृष्णं साक्षात्कर्तुम् नारद: द्वारिकापुर्यां आगच्छति । विश्वाधारभूत: श्रीकृष्ण: गगनात् आयान्तं ब्रह्मणो मानसपुत्रं नारदमुनिम् ददर्श ।

सूर्यस्य गति: तिर्यग्भवति । तस्य गति: पूर्वस्या: दिश: पश्चिमदिशं यावत् भवति । अग्ने: ऊर्ध्वज्वलनं तु प्रसिद्धम् किन्तु सर्वत: प्रसरणशीलं तेज: अध: पतति । किमेतत् ? द्वारिकापुरीनिवासिन: जना: व्याकुलं भूत्वा नारदं अपश्यन् । भगवान् श्रीकृष्ण: तं मुनिं प्रथमं तु तेजोराशिं निश्चितवान् पश्चात् शरीरी इति अवधारितवान् ।

एष पुरुषविशेष: (नारद:) नूतनेषु विपुलेषु मेघेषु स्थित: ईदृशं भाति यादृशं ताण्डवनृत्तावसरे भगवान् शम्भु: । नारद: कमलकेसरवत् पीतवर्णान् जटान् धारयन्त: ईदृक् प्रतिभाति यथा तुषारभूमिसमुत्पन्नां लतान् धारयन्त: पर्वतराजहिमालय: । शुभ्रवर्ण: श्रीनारद: पीतवर्णमुञ्ज-निर्मितमेखलाधारिण: द्वितीय: बलराम: इव प्रतिभाति ।

नारद: शरत्कालीनमेघसदृश: श्रीकृष्णेन दृष्ट: । नारद: स्वशरीरे मृगचर्मं धारयन् अस्ति । स: देवेन्द्रवाहनैरावतसदृश: शोभायमान: अध: आगच्छन् अस्ति । निरन्तरताडितवीणातन्त्रीं तथा च मणिनिर्मितजपमालां धारयन्तं शोभमानं तं पुरुषविशेषं भगवान् श्रीकृष्ण: 'नारद' इत्यबोधि । महतीवीणा धारयन्त: मुनिश्रीनारद: तत: वसुदेवसद्मनि श्रीकृष्णं प्राप्तवान् ।

05-06-21

डॉ० निर्मलकुमार झा, सं० प्राचार्य ।
राधा-उमाकान्त संस्कृत महावि० सुखसेना,
पूर्णियाँ ।
का०सि०द०सं०वि०वि० दरभङ्गा ।